https://www.mpboardonline.com

Roll No. ....................

# 922

## कक्षा 9 वीं परीक्षा, 2020-21

[M-2703-B]

# SANSKRIT

# संस्कृत

[Total No. of Questions: 19] [Total No. of Printed Pages: 08]

[Time: 03 Hours] [Maximum Marks: 100]

*निर्देशाः –*

*(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।*

*(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।*

प्र.1 अधोलिखितेषु उचित – विकल्पं चित्वा लिखत – (5X1=5)

(i) 'पुस्तकालयः' इत्यस्मिन् पदे सन्धिः अस्ति –

(अ) दीर्घ सन्धिः (ब) अयादि सन्धिः

(स) पूर्वरूप सन्धिः (द) गुण सन्धिः

(ii) 'महेशः' इत्यस्मिन् पदे सन्धि–विच्छेदः भवति –

(अ) महा + ईशः (ब) महे + ईशः

(स) म + हीशः (द) महान् + शः

(iii) 'मनोहरः' इत्यस्मिन् पदे सन्धिः वर्तते –

(अ) व्यञ्जन सन्धिः (ब) स्वर सन्धिः

(स) विसर्ग सन्धिः (द) पूर्वरूप सन्धिः

(iv) 'विद्या माता इव रक्षति' इत्यस्मिन् वाक्ये अव्ययम् अस्ति –

(अ) इव (ब) माता

(स) विद्या (द) रक्षति

(v) अधोलिखितेषु अव्ययं नास्ति –

(अ) सर्वत्र (ब) अद्य

(स) बालकः (द) एव



https://www.mpboardonline.com

https://www.mpboardonline.com

प्र.2 अधोलिखितेषु प्रश्नेषु उचित – विकल्पं चित्वा लिखत – (5×1=5)

(i) 'पञ्चवटी' इत्यस्मिन् पदे समासः अस्ति –
(अ) द्विगु समासः (ब) कर्मधारय समासः
(स) तत्पुरुष समासः (द) द्वन्द्व समासः

(ii) 'घनश्यामः' इत्यस्मिन् पदे समास विग्रहः अस्ति –
(अ) घनश्यामः (ब) घन इव श्यामः
(स) श्यामः घनः (द) घनेश्यामः

(iii) तत्पुरुष – समासस्य उदाहरणम् अस्ति –
(अ) विद्याहीनः (ब) त्रिभुवनम्
(स) दशाननः (द) महाशयः

(iv) 'सम्मानः' इत्यस्मिन् पदे उपसर्गः अस्ति –
(अ) सम (ब) सम्
(स) सम् (द) स

(v) उपसर्गयुक्तं पदं चित्वा लिखत –
(अ) पराजयः (ब) बालकः
(स) धीरः (द) मोहनः

प्र.3 अधोलिखितेषु उचित – विकल्पं चित्वा लिखत – (5×1=5)

(i) 'पर्वतः' इत्यस्य पदस्य पर्यायपदम् अस्ति –
(अ) गिरिः (ब) तुरंगः
(स) भूपतिः (द) तरुः

(ii) 'भूपतिः' इत्यस्य पदस्य पर्यायपदम् अस्ति –
(अ) वाणी (ब) राजा
(स) धरणी (द) ध्रुवः

(iii) 'वृक्षः' इत्यस्य पदस्य पर्यायपदम् अस्ति –
(अ) तरुः (ब) पवनः
(स) शक्रः (द) पुष्पः

(iv) 'सत्यम्' इति पदस्य विलोमपदम् अस्ति –
(अ) कथनम् (ब) असत्यम्
(स) अनभ्यासः (द) सत्यम्

(v) 'दुर्बुद्धिः' इति पदस्य विलोमपदम् अस्ति –
(अ) सुबुद्धिः (ब) बुद्धः
(स) अबुद्धि (द) निवृत्तः



https://www.mpboardonline.com

प्र.4 अधोलिखितेषु उचित – विकल्पं चित्वां लिखत – (5×1=5)

(i) 'पठति' इत्यस्मिन् पदे लकारः अस्ति –

(अ) लृट् लकारः (ब) लट् लकारः

(स) लोट् लकारः (द) लङ् लकारः

(ii) 'भविष्यामः' इत्यस्मिन् पदे वचनम् अस्ति –

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम् (द) कोऽपि नास्ति

(iii) 'अगच्छत्' इत्यस्मिन् पदे धातुः अस्ति –

(अ) गम् (ब) अगच्छ्

(स) भव् (द) अग्

(iv) 'पास्यन्ति' इत्यस्मिन् पदे पुरुषः अस्ति –

(अ) प्रथम पुरुषः (ब) मध्यम पुरुषः

(स) उत्तम पुरुषः (द) कोऽपि नास्ति

(v) 'अपचत्' इत्यस्मिन् पदे लकारः अस्ति –

(अ) लङ्लकारः (ब) लोट्लकारः

(स) लृट्लकारः (द) लट्लकारः

प्र.5 अधोलिखितेषु उचित – विकल्पं चित्वा लिखत – (5×1=5)

(i) 'पठ् + तुमुन्' इति योजयित्वा भवति –

(अ) पठत् (ब) पठितुम्

(स) पठयित्वा (द) पठन्

(ii) 'कृत्वा' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) क्त्वा (ब) क्त

(स) तुमुन् (द) क्तिन्

(iii) 'आगत्य' इत्यस्मिन् पदे प्रकृति – प्रत्ययः अस्ति –

(अ) अ + गम् (ब) आ + गम् + ल्यप्

(स) अ + ल्यप् (द) गम् + ल्यप्

(iv) 'हस् + क्त' इति योजयित्वा भवति –

(अ) हसितः (ब) हिसतुम्

(स) हसत् (द) हसन्

(v) 'गच्छन्' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) ल्यप् (ब) शतृ

(स) शानच् (द) तुमुन्


https://www.mpboardonline.com

प्र.6 युग्ममेलनं कुरुत – (4X1=4)

| | (अ) | | (ब) |
|---|---|---|---|
| (i) | कुलक्रमागतः | – | रामायणे |
| (ii) | दानवीरः | – | वीणाम् |
| (iii) | निनादय | – | जीमूतवाहनः |
| (iv) | जटायुः | – | कल्पतरुः |

प्र.7 अधोलिखितेषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – (4X1=4)

(i) तुला मूषकैः भक्षिता आसीत्।

(ii) मोदकानि पूजानिमित्तानि रचितानि आसन्।

(iii) ग्रामे निर्धनास्त्री अवसत्।

(iv) वृक्षाः फलं न खादन्ति।

प्र.8 अधोलिखितेषु शब्दरूपाणि निर्देशानुसारं लिखत – (2X1=2)

(i) 'राम' इति शब्दस्य प्रथमा विभक्तिः, त्रिषुवचनेषु।

(ii) 'गुरु' इति शब्दस्य चतुर्थी विभक्तिः, त्रिषुवचनेषु।

प्र.9 अधोलिखितेषु द्वयोः शब्दरूपाणि निर्देशानुसारं लिखत – (2X1=2)

(i) 'अस्मद्' इति शब्दस्य द्वितीया विभक्तिः, त्रिषुवचनेषु।

(ii) 'किम्' (पुल्लिङ्ग) इति शब्दस्य प्रथमा विभक्तिः, त्रिषुवचनेषु।

(iii) 'तत्' (स्त्रीलिङ्ग) इति शब्दस्य प्रथमा विभक्तिः, त्रिषुवचनेषु।

प्र.10 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् कण्ठस्थीकृतं सुभाषितद्वयं लिखत। (4)

प्र.11 अधोलिखितेषु प्रश्नेषु एकपदेन उत्तरं लिखत – (केचित् चत्वारः) (4X1=4)

(i) कविः कां सम्बोधयति?

(ii) माता काम् आदिशत्?

(iii) वाणिकपुत्रस्य किं नाम आसीत्?

(iv) मानवः कुत्र सुरक्षितः तिष्ठति?

(v) मनः कीदृशं भवति?

प्र.12 स्वप्राचार्यस्य कृते अवकाशार्थं प्रार्थनापत्रं लिखत। (4)

<u>अथवा</u>

स्वप्राचार्यस्य कृते शुल्कक्षमापनार्थं प्रार्थनापत्रं लिखत।

प्र.13 अधोलिखितम् अपठित गद्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत – (5×1=5)

उत्साहः उदासीनता, निराशा चेति तिस्त्रः मनसः अवस्थाः। शिशवः सदा उत्साहशीलाः इति विदितम् एव। युवानः अपि प्रायेण उत्साहशीलाः। अनेके वृद्धाः अपि तथैव। वयसः उत्साहस्य च नास्ति सम्बंधः। उत्साहः मानवस्य सहजः स्वभावः। सः मनसः शरीरस्य च विकासाय भवति। शिशुः उत्साहेन सर्व ग्रहीतुं, सर्वैः सह खादितुं सर्वैः सह खेलितुं च प्रवर्तते। प्रतिबन्धे कृते रोदिति। उपहासे कृते क्रोधं प्रकटयति किन्तु निराशो न भवति।

(i) शिशुः उपहासे कृते किं करोति?

(ii) मनसः कति अवस्थाः सन्ति?

(iii) के के उत्साहशीलाः भवन्ति?

(iv) 'निराशा' इति पदस्य विलोमपदं लिखत।

(v) 'चेति' इत्यस्मिन् पदे कः सन्धिः अस्ति?

प्र.14 रिक्तस्थानानि पूरयत– (5)

(फलानि, मृदुं, मलिनं, त्रीणि, जीमूतकेतुः)

(i) जीमूतवाहनः ............................................ पुत्रः अस्ति।

(ii) गीतिं ............................................ गातुं कथयति।

(iii) वृक्षाः स्वयं ............................................ न खादन्ति।

(iv) नदीनां वारि ............................................ सञ्जातम्।

(v) ऋषिकुल – परम्परायां ज्ञानप्राप्तेः ............................................ साधनानि सन्ति।



https://www.mpboardonline.com

प्र.15 अधोलिखितेषु "पञ्च" अशुद्धकारक क्रिया–पदानां शुद्धिः करणीया – (5×1=5)

(i) गुरुं नमः।

(ii) त्वम् पठामि।

(iii) वृक्षात् पत्राः पतन्ति।

(iv) सीता रामं सह वनं गच्छति।

(v) अहं पश्यसि।

(vi) सः विद्यालये गच्छति।

प्र.16 अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत– (2×3=6)

(i) निर्धनायाः वृद्धायाः दुहिता कीदृशी आसीत्?

(ii) कालः कस्य रसं पिबति?

(iii) मानवानां चेतांसि कीदृशानि भवन्ति?

(iv) स्वतुलां याचमानं जीर्णधनं श्रेष्ठी किम् अकथयत्?

(v) वसन्ते किं भवति?

(vi) मल्लिका चन्दनश्च मासपर्यन्तं धेनोः कथम् अकुरुताम्?

प्र.17 अधोलिखितेषु गद्यांशद्वयं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत – (2×5=10)

(अ) महर्षिवाल्मीकिः विरचितम् "रामायणम्" इत्यस्य ग्रन्थस्य अरण्यकाण्डात् समुद्धृतो अस्ति। अत्र जटायु – रावणयोः युद्धस्य वर्णनम् अस्ति। पक्षिराजजटायुः पञ्चवटीकानने विलपन्त्याः सीतायाः करुणक्रन्दनं श्रुत्वा तत्र गच्छति। सः सीतापहरणे निरतं रावणं तस्मात् निन्द्यकर्मणः निवृत्यर्थं प्रबोधयति। परञ्च अपरिवर्तितमतिः रावणः तमेव अपसारयति।

(i) रामायणं कः रचितवान्?

(ii) कयोः युद्धस्य वर्णनम् अस्ति?

(iii) पक्षिराजजटायुः कस्याः करुणक्रन्दनं श्रुत्वा तत्र गच्छति?

(iv) 'श्रुत्वा' इत्यस्मिन् पदे प्रकृति – प्रत्ययं पृथक् कुरुत?

(v) 'पञ्चपात्रम्' इत्यस्मिन् पदे कः समासः अस्ति?

(ब) प्रकृतिः समेषां प्राणिनां संरक्षणाय यतते। इयं सर्वान् पुष्णाति विविधैः प्रकारैः, सुखसाधनैः च तर्पयति। पृथिवी, जलम्, तेजः, वायुः, आकाशः च अस्याः प्रमुखानि तत्त्वानि। तान्येव मिलित्वा पृथक्तया वाऽस्माकं पर्यावरणं रचयन्ति। आव्रियते परितः समन्तात् लोकः अनेन इति पर्यावरणम्। यथा अजातश्शिशुः मातृगर्भे सुरक्षितः तिष्ठति तथैव मानवः पर्यावरणकुक्षौ।

(i) प्रकृतेः प्रमुख तत्त्वानि कानि सन्ति?

(ii) प्रकृतिः केषां संरक्षणाय यतते?

(iii) अजातश्शिशुः कुत्र सुरक्षितः तिष्ठति?

(iv) 'पुष्पम्' इत्यस्मिन् पदे पर्यायपदं अस्ति।

(v) 'सुख' इत्यस्मिन् पदे विलोमपदम् अस्ति।

(स) तदा स बालः 'अलं भाषणेन अनेन मिथ्यागर्वितेन कीटेन' इति विचिन्त्य अन्यत्र दत्तदृष्टिः चञ्च्वा तृणशलाकादिकम् आददानम् एकं चटकम् अपश्यत्, अवदत् च – "अयि चटकपोत! मानुषस्य मम मित्रं भविष्यसि। एहि क्रीडावः। एतत् शुष्कं तृणं त्यज स्वादूनि भक्ष्यकवलानि ते दास्यामि" इति। स तु "मया वटद्रुमस्य शाखायां नीडं कार्यम्" इत्युक्त्वा स्वकर्मव्यग्रोः अभवत्।

(i) बालः कम् अपश्यत्?

(ii) 'कीदृशं तृणं त्यज' इति बालः अवदत्?

(iii) कस्य शाखायां नीडं कार्यम्?

(iv) 'अभवत्' इत्यस्मिन् पदे कः लकारः?

(v) 'इत्युक्त्वा' इत्यस्मिन् पदे कः प्रत्ययः?

प्र.18 अधोलिखितं पद्यांशद्वयं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (2×5=10)

(अ) प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता।।

(i) जन्तवः केन तुष्यन्ति?

(ii) कुत्र दरिद्रता न भवेत्?

(iii) 'दरिद्रता' इत्यस्मिन् पदे विलोमपदं लिखत?

(iv) 'वक्तव्यम्' इत्यस्मिन् पदे कः प्रत्ययः अस्ति?

(v) तुष्यन्ति इत्यस्मिन् पदे कः लकारः अस्ति?

https://www.mpboardonline.com

(ब) वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः।।

(i) वित्ततः क्षीणः कीदृशः भवति?

(ii) यत्नेन किं रक्षेत् वित्तं वृत्तं वा?

(iii) कस्मात् क्षीणः मानवः हतः?

(iv) किं एति याति च?

(v) 'यत्नः' इति पदस्य पर्यायं लिखत?

(स) गुणा गुणज्ञेषु गुणाः भवन्ति।
ते निर्गुणं प्राप्य भवन्ति दोषाः।।
आस्वाद्यतोयाः प्रवहन्ति नद्यः।
समुद्रमासाद्य भवन्त्यपेयाः।।

(i) गुणाः केषु गुणा भवन्ति?

(ii) गुणाः कं प्राप्य दोषाः भवन्ति?

(iii) नद्यः जलं कदा अपेयो भवति?

(iv) 'भवन्त्यपेयाः' इत्यत्र कः सन्धिः?

(v) 'प्राप्य' इत्यस्मिन् पदे कः प्रत्ययः?

प्र.19 अधोलिखितेषु एकं विषयं स्वीकृत्य संस्कृतभाषायाम् निबंधं लिखत – (10)

(i) मम पाठशाला

(ii) पुस्तकम्

(iii) धेनुः

(iv) अस्माकं देशः

-----------------------------------------------


https://www.mpboardonline.com